"हृजतो मे चितिर्वाभिः श्राम्यमाना रसां गता ॥"
"रसां रसातलं गता।"इति तट्टीकायां स्वामिपादाः ॥ नदी। यथा, ऋग्वेदे ।१।११२।१२।
"याभी रसां चोदसोद्नः पिपिन्वथुः ॥"
"रसां नदीम्।" इति तद्भाष्ये सायणः ॥)
रसाखनः, पुं, ( खनतीति । खन् विदारे+अच् । रसाया भूमेः खनः । ) कुक्कुटः । इति शब्दचन्द्रिका ॥
रसाग्रजं, क्ली, ( रसानां अग्रजं रसस्य अग्रे जायते इति वा । जन्+डः । ) रसाञ्जनम् । इति राजनिर्घण्टः ॥
रसाञ्जनं, क्ली, ( रसजातमञ्जनं इति मध्यपदलोपी कर्म्मधारयः । ) रसजाताञ्जनविशेषः । रसवत् इति भाषा ॥ तत्पर्य्यायः । रसगर्भम् २ तार्क्ष्यशैलम् ३ । इत्यमरः ॥ रसोद्भूतम् ४ रसाग्रजम् ५ कृतकम् ६ बालभैषज्यम् ७ दार्व्वीक्वाथोद्भवम् ८ रसराजः ९ वर्य्याञ्जनम् १० रसनाभम् ११ अग्निसारम् १२ । अस्य गुणाः । हिमत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । मधुरत्वम् । कटुत्वम् । रक्तपित्तविषच्छर्द्दिहिक्कापस्मारनाशित्वञ्च ।
"दौत्यान्तु आयमानायां तत्छिद्रन्तु रसाञ्जनम् ।
तदभावे तु कर्त्तव्यं दार्व्वीक्वाथसमुद्भवम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"दार्व्वीक्वाथसमं क्षीरं पादं पक्का यथाघनम् ।
तदा रसाञ्जनाख्यं तन्नेत्रयोः परमं हितम् ॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम् ।
रसाञ्जनं कटु श्लेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥"
इति भावप्रकाशः ॥
रसाढ्यः, पुं, ( रसेनाढ्यः युक्तः । ) आम्रातकः । इति राजनिर्घण्टः ॥ ( आम्रातकशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )
रसातलं, क्ली, ( रसायाः तलं निम्नभागस्थलोकविशेषः । ) पातालम् । इत्यमरः ॥ ( यथा, महाभारते । १२ । ३४७ । ५६ ।
"जग्राह वेदानखिलान् रसातलगतो हरिः ॥")
पातालभेदः । यथा,—
"अतलं वितलञ्चैव नितलञ्च तलातलम् ॥
महातलञ्च सुतलं सप्तमञ्च रसातलम् ॥
पातालभेदाः सप्तैव नामतः कीर्त्तिता अमी ।
तत्र पातालमेकैकं दशसाहस्रयोजनम् ॥"
इति शब्दमाला ॥
( इदमेव निवातकवचानां निवासस्थानम् । तथा च देवीभागवते । ८ । २० । ८—१२ ।
"ततोऽधस्ताच्च विवरे रसातलसमाह्वये ।
दैतेया निवसन्त्येव पणयो दानवाश्च वै ॥
निवातकवचा नाम हिरण्यपुरवासिनः ।
कालेया इति च प्रोक्ताः प्रत्यनीका हविर्भुजाम् ॥
महौजसश्चोत्पत्तेरव महासाहसिनस्तथा ।
सकलेशस्य च हरेस्तेजसा हतविक्रमाः ॥
बिलेशया इव सदा विवरे निवसन्ति हि ।
ये वै वाग्भिः सरमया शक्रदूत्या निरन्तरम् ॥
मन्त्रवर्णाभिरसुरास्ताड़िता बिभ्यति स्म ह ॥")
रसादानं, क्ली, (रसानां आदानं ग्रहणम् ।) शोषणम् । इति हेमचन्द्रः ॥ ( रसाया दानम् । ) भूमिदानञ्च ॥
रसाधारः, पुं, ( रसानां जलानां आधारः । रसां पृथिवीं धरति स्वाकर्षणेनेति वा । धृ+णिच् ।) सूर्य्यः । इति शब्दरत्नावली ॥ रसस्याधारश्च ॥
रसाधिकः, पुं, ( रसाय स्वर्णादीनां द्रवीकरणाय अधिकः प्रबलः । ) टङ्कणः । इति राजनिर्घण्टः ॥ अधिकरसश्च ॥
रसाधिका, स्त्री, ( रसेन अधिका । ) काकोलीद्राक्षा । इति राजनिर्घण्टः ॥
रसाभासः, पुं, (रस इव आभासते इति । आ+भास्+अच् । ) अनौचित्यविशिष्टरसः । तस्य लक्षणं यथा,—
"अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ।"
अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यम् । तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते । उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च । बहुनायकविषयायां रतौ तथानुभयनिष्ठायां प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते शृङ्गारे अनौचित्यम् । रौद्रे गुर्व्वादिगतकोपे । शान्ते च हीननिष्ठे । गुर्व्वाद्यालम्बने हास्ये । ब्रह्मवधाद्युत्साहे । अधमपात्रगते तथा वीरे । उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र । तत्र रतेरुपनायकनिष्ठत्वे यथा मम ।
"स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी
क्षौणीमावृणुते तमालमलिनच्छायातमः-
सन्ततिः ।
तन्मे सुन्दर ! मुञ्च कृष्ण ! सहसा वर्त्मेति
गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः
पातु वः ॥"
बहुनायकनिष्ठत्वे यथा,—
"कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु ! पाण्डुरयं कपोलः ।"
अनुभयनिष्ठत्वे यथा,—
मालतीमाधवे नन्दनस्य मालत्याम् । पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वमिति श्रीमल्लोचनकाराः । तत्रोदाहरणं यथा रत्नावल्याम् । सागरिकाया अन्योऽन्यदर्शनात् प्राक् वत्सराजे रतिः । प्रतिनायकनिष्ठत्वे यथा हयग्रीववधे । हयग्रीवस्य जलक्रीड़ावर्णने । अधमपात्रगतत्वे यथा,—
"जघनस्थलनद्धपत्रवल्ली-
गिरिमल्लीकुसुमानि कापि भिल्ली ।
अवचित्य गिरौ पुरो निषस्ना
स्वकचानुत्कचयाञ्चकार भर्त्रा ॥"
तिर्य्यग्गतत्वे यथा,—
"मल्लीमतल्लीषु वनान्तरेषु
वल्ल्यन्तरे वल्लभमाह्वयन्ती ।
चञ्चद्विपञ्ची कलनादभङ्गी
सङ्गीतमङ्गीकुरुते स्म भृङ्गी ॥"
आदिशब्दात्तापसादयः । रौद्राभासो यथा —
"रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो
मुहु-
र्मुक्ताकर्णमपेतभीर्धृतधनुर्व्वाणो हरेः पश्यतः ।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्व्विक्रमं
कीर्त्तयन्
अंसास्फोटपटुर्युधिष्ठिरमसौ हन्तु प्रविष्टोऽर्ज्जुनः ॥"
भयानकाभासो यथा —
"अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि कौशिकः ॥"
उत्तमनीचविषयमेव हि भयं रसप्रकृतिः । एवमन्यत्र । इति साहित्यदर्पणे ३ परिच्छेदः ॥
रसाम्लं, क्ली, (रसात्मकोऽम्लो यत्र ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥ चुक्रम् । इति भावप्रकाशः ॥
रसाम्लः, पुं, (रसेन सह अम्लो यत्र ।) अम्लवेतसः । इति राजनिर्घण्टः ॥
रसायकः, पुं, (रसं रसत्वमयति प्राप्नोति इति । अय+ण्वुल् । ) तृणविशेषः । इति शब्दचन्द्रिका ॥
रसायनं, क्ली, कटिः । इति राजनिर्घण्टः ॥ (रसो दुग्धं अयनं मूलं यस्येति । ) तक्रम् । इति हेमचन्द्रः ॥ विषम् । ( रसा रसरक्तादय ईयन्ते प्राप्यन्ते अनेनेति । इ+ल्युट् । ) ज्वराद्याधिनाशकौषधम् । इति मेदिनी ॥ (यथा, माघे । २ । ९३ ।
"षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षं रसायनम् ।
भवन्त्यस्यैवमङ्गानि स्यात्मूनि बलवन्ति च ॥")
"न सूतेन विना कान्तं न कान्तेन विना रसः ।
सूतकान्तसमायोगात् रसायनमुदीरितम् ॥"
इति राजनिर्घण्टः ॥ * ॥
अथ रसायनाधिकारः । तत्र रसायनस्य लक्षणमाह ।
"यज्जराव्याधिविध्वंसि वयसस्तम्भकन्तथा ।
चक्षुष्यं बृंहणं वृष्यं भेषजं तद्रसायनम् ॥"
रसायनस्य फलमाह ।
"दीर्घमायुः स्मृतिर्मेधामारोग्यं तरुणं वयः ।
देहेन्द्रियबलं कान्तिं नरो विन्देद्रसायनात् ॥"
तद्विधिमाह ।
"पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम् ।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा ॥
नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ।
न भाति वाससि श्लिष्टे रङ्गयोग इवाहितः ॥"